M. T. B. COLLEGE, SURAT
Manuscripts Library
No. Ref.
Sor. 841
Title: Dravya nāsha Vadaitha
AIT.

841

841

द्रव्यनाशवादार्थः

Dravya-nāsha-Vādārtha	Title
	Author
	Editor
1228	Year, Vols.
	Publisher
841	Remarks

श्रीगणेशाय नमः॥ ॥अथ द्रव्यनाशं प्रति समवाय्यसमवायिकारणनाशौ हेतू॥ अत्र केचित् समवायिनाशस्य नाशत्वेनैव हेतुता स्वप्रतियोगि
समवेतत्वं कारणत्वघटकप्रत्यासत्तिः॥ अतो न तंतुनाशाद् ध्वंसनाशप्रसंगः॥ तंतुनाशस्य तेन संबंधेन घटादावसत्त्वात्॥ नाशत्वं कार्यताव
च्छेदकं तत्प्रत्यासत्तिः स्वप्रतियोगिसमवेतत्वकालिकविशेषणतोभयसंबंधेन नाशविशिष्टवृत्तिप्रतियोगितातादृशनाशत्ववृत्ति
त्वनिवेशादसमवायिकारणनाशाद् द्रव्यनाशे न व्यभिचारः। तादृशप्रतियोगिनो द्रव्यस्य तादृशोभयसंबंधेन नाशवत्त्वाभावात्
तादृशस्यापि कालिकविशेषणतासंबंधेन तत्त्वेऽपि स्वप्रतियोगिसमवेतत्वसंबंधेन च भावित्वावच्छिन्नविनाशकत्वादुक्त
संबंधेन नाशवत्त्वमित्युक्तम्। न च तादृशोभयसंबंधेन नाशवन्नाशत्वमेव कार्यतावच्छेदकमस्तु किं संबंधमध्ये नाशाव
त्वनिवेशेनेत्यवाच्यम्। नाशवन्नाशत्वमित्यस्य नाशवत्प्रतियोगिकनाशार्थकत्वेन प्रतियोगितायां द्विधा निवेशगौरवमित्या
हुः। तन्तुसंयोगनाशानाशद्रव्यनाशत्वं तादृशद्रव्यवृत्तिप्रतियोगितासंबंधेन नाशत्वमेव वा जन्यतावच्छेदकं गतौ नासमवायि
कारणजन्यद्रव्यनाशे व्यभिचार इति॥ नद्वसत्। द्रव्यनाशजन्यद्रव्यनाशे व्यभिचारवारणाय संयोगनाशजन्यतावच्छेदककोय

वपिद्रव्यनाशानाश्यत्वनिवेशप्रसंगेनान्योन्याश्रयात्‌• द्रव्यनाशजन्यतावच्छेदकताघटितसंयोगनाशजन्यतायाः तज्जन्यतावच्छे
दकताघटितद्रव्यनाशजन्यतायाअवच्छेदककोटौनिवेशात्‌। एवंसमवायिकारणनाशान्यविजातीयसंयोगनाशत्वेनहेतुत्वं। स्वप्र
तियोगिसामानाधिकरण्यंप्रमात्वासतिः कार्यतावच्छेदकः स्वप्रतियोगिसामानाधिकरण्यकालिकविशेषणतोभयसंबंधेन विजाती
यसंयोगनाशवद्वृत्तिप्रतियोगितासंबंधेननाशत्वंसंबंधमध्येनादृशोभयसंबंधेननाशवद्वृत्तित्वनिवेशात्‌• अपरद्रव्यना
शेनव्यभिचारः। नवस्वप्रतियोगिजन्यत्वसंबंधेनोभयोरेकहेतुतयैवोपपत्तौकिंहेतुनाद्वयेनेतिवाच्यम्‌• स्वप्रतियोगि
जन्यतायाश्चकारणतावच्छेदकसंबंधत्वेदंडनाशादपिघटनाशप्रसङ्गात्‌। तद्यावत्त्वानुगतसंबंधतावच्छेदकधर्मस्यनिवक्तु
मशक्यत्वात्‌। इतिप्राञ्चः। नव्यास्तुसर्वत्रासमवायिकारणनाशएवद्रव्यनाशहेतुः। दंडकादिनाशस्थलेविद्यमानविभ
क्ताविषयकेतस्यक्लृप्तत्वात्‌• तत्समवायिनः परमाणावादेनाशाभावात्‌• घटादिनाशस्थलेपितस्यहेतुतायाअवश्यक
त्वात्‌• यत्रमुद्गरादिघातादिनाकपालादिनाशः तत्रापितदधीनकपालद्वयसंयोगनाशाधीनएवघटनाशः। कार्य

कारणभावा रकल्प्यतः ण विकंबस्यतद्गुत्वात्‌• अथप्राचीनमतेसमवायिकारणनाशस्यद्रव्यनाशंप्रतिस्वातंत्र्येणहेतुता
नकल्प्यते किंतुद्रव्यसमवेतरूपादिनाशंप्रतिसमवायिनाशस्यहेतुतायाअवश्यकत्वात्‌• तत्रैवद्रव्यनाशसाधारणनाशत्व
स्यैवजन्यतावच्छेदकत्वात्‌नकारणताधिक्यं• नवतन्नाशंविनापितत्समवेतस्यरूपादेः पाकादिनासंयोगादेश्चविभागादि
नानाशात्‌• तत्तद्रूपादिनाशस्यैवजन्यतावच्छेदकत्वौचित्यात्‌कथंतादृशकारणतायानाद्रव्यनाशसाधारण्यमितिवाच्यं।
तत्तद्रूपनाशत्वादिनाकार्यतोपगमेरूपरत्वादिभेदेनानन्तकार्यकारणभावप्रसंगात्‌। तदपेक्षयालाघवेनतत्तत्पालादि
नाशकालीनतत्तत्समवेतप्रतियोगिकनाशत्वस्यैवजन्यतावच्छेदकत्वोपगमात्‌• तादृशकार्यकारणभावस्यद्रव्यनाशसाधार
ण्यात्‌: तत्कपालनाशकालीनत्वंचकालिकसंबंधेनकपालनाशवत्वं। अतोनस्थूलकालमादायदोषः। नवकालिकसंबंधेक
पालनाशवत्वंनिवेशात्‌• तत्तत्क्रियादिमत्वादिनिवेशमादायविनिगमनाविरहप्रसंगात्‌• तत्तद्रूपनाशत्वादिनामेवजन्यता
वच्छेदकत्वमितिवाच्यं• कारणताग्रहकालेकालनाशरूपकारणोपस्थितेरावश्यकत्वात्‌• कार्यतावच्छेदककोटौतन्निवेश

२

स्येचितत्वात् । क्रियादिमत्वनिवेशोकारणतायाःहकालेतन्नियतोपस्थितेभावात् उपस्थितिकल्पनेगोरवेणविनिगमनाविरहान्नवका २
२ शात् । नवतत्कपालसमवेतनाशत्वस्यजन्यतावच्छेदकत्वेकपालनिष्ठतत्तद्व्यक्तित्वंतत्कपालत्वतद्रूपंतदियरूपादिवेतिविनिगमना
विरहेणतद्रूपरसादिभेदेनकार्यकारणभावबाहुल्येनतत्तद्रूपनाशत्वादिनातत्तन्नाशनिष्ठतत्तद्व्यक्तित्वादिनावाजन्यतावच्छेदक
त्वमुचितमितिवाच्यं । एवमपिघटनाशतत्समनियतसंयोगादिनाशयोरैक्याभ्युपगमात् । तादृशनिष्ठतद्व्यक्तित्वावच्छिन्नं
प्रतितत्कपालादिनाशस्यकारणतानिर्वाहात् । वस्तुतस्तत्समवेतनाशेसमवायिनाशस्यतत्कपालनाशत्वादिनानहेतुताकिंतु
सामान्यतः स्वप्रतियोगिसमवेतत्वकालिकविशेषणतोभयसंबंधेननाशावच्छिन्नप्रतियोगितासंबंधेननाशत्वावच्छिन्नंप्रतिस्व २
प्रतियोगिसमवेतत्वकालिकविशेषणतोभयसंबंधेननाशत्वेनैवहेतुताकल्प्यते । इत्थंचतादृशैकहेतुतयैवोपपत्तौहेतुता हेरंब
न्तरंनास्त्येवेतिचेत् । एवमपिप्राचीनमतेसमवायिकारणनाशजन्येद्रव्यनाशेव्यभिचारवारणायसंयोगनाशजन्य
तावच्छेदककोटोप्रतियोगिनितद्वृत्तिशिष्टानिवेशेगोरवंदुष्परिहरमेव । अथनव्यमतेस्वप्रतियोगिसमवेतत्वरूपकारण

तावच्छेदकप्रत्यासत्त्यासमवायिकारणनाशस्यैकारणस्यद्रव्येपिसत्वात् । संयोगनाशोत्पत्तिकालेद्रव्यनाशोत्पत्तिर्दुर्वारैवा न
वद्रव्यनाशे संयोगनाशस्यविशेषसामग्रीत्वात् । तद्विरहेणतदानींनद्रव्यनाशोत्पत्तिरितिवाच्यं । एतादृशविशेषसाम
ग्रींविनासामान्यसामग्रीबलात् । रूपादिषुद्रव्यसमवेतनाशत्वावच्छिन्नोत्पत्तेद्रव्येपितादृशसामान्यधर्मावच्छिन्नापत्ति
संभवादितिचेन्न । द्रव्यान्यनाशत्वावच्छिन्नंप्रतितादात्म्येनप्रतियोगिनांद्रव्यान्यत्वेनविशेषणताविशेषणद्रव्यभेदस्यद्रव्यभे
दत्वेनवाहेतुताकल्पनात् । तादृशसामग्रीसहकृतस्यैवसमवायिनाशस्यसमवेतनाशोत्पादकतयाद्रव्येतयाविधविशेष
णतासामग्रीविरहात्तदापादनासंभवात् । नचतादृश कल्पनमेवनव्यमतेगुर्विति वाच्यं । प्राचीनमतेसंबंधनिष्ठोभ
यत्वस्यदुर्वचतयास्वप्रतियोगिसामानाधिकरण्यविशिष्टकालिकसंबंधत्वेनविशेषणीयतयाकालिकविशेषणवि
शिष्टस्वप्रतियोगिसामानाधिकरण्यसंबंधमादायविनिगमनाविरहेणसंयोगनाशकारणताबाहुल्यादवच्छेदक
गोरवंबाधेतितादृशकारणतायाएवकल्पयितुमुचितत्वात् । नचभवन्मतेद्रव्यान्यत्वेनमूर्त्तान्यत्वेनएवंद्रव्यान्य

३ विनाशत्वंवाजन्यतावच्छेदकमित्यत्रविनिगमनाविरहेणकारणताबाहुल्यमितिवाच्यम्· मूर्त्तत्वजातौमानाभावेनतादृश
नाविरहासंभवात्· वस्तुतस्तुगुणत्वव्याप्यजातिविशेषस्यैवजनकतावच्छेदकत्वोपगमेनजन्यतावच्छेदककोटावपितस्यैवनि
वेशान्नोक्तदोषः।नैवतादृशजातौमानाभावइतिवाच्यं· द्रव्यान्यत्वेसत्यनुबद्धिकं।मनिबाजुधाभावादिमात्तविध्यताय भेदक
कोटिप्रविष्टतयातात्सिद्धेः—— द्रव्यनाशत्वावच्छिन्नंप्रतिविजातीयसंयोगनाशस्यैवहेतुत्वेमहाघटनाशकसंयोगनाशा
त्खण्डघटस्योत्पत्त्याविधायकवाक्येनव्यापारगतस्वर्गादिफलसाधनताबोधनमपितेषामुपपद्यते· इतियुक्तमुत्पश्या
मः।नचैवमपूर्वलक्षणानाहरहरित्यादिविधीनांतन्मतेसंग्रहइतिवाच्यम्· इष्टसाधनत्वानिष्टसाधनत्वयो —
रेकप्रयोजनधर्मत्वेनाननुगम्यलक्षणाभिवेशनीयतया।नित्यविधिसंग्रहसंभवात्· नित्यविधिस्थलिङ्गपदस्यानि हेरंब
ष्टसाधनतावत्त्ववाचकताभ्युपगम्यैवतस्यप्रवर्तकत्वनिर्वाहान्· न्यायमतेतुनित्यस्थलेसर्वत्रइष्टसाधनत्वमेव ३
विध्यर्थः।संध्योपासनादेरपिब्रह्मलोकादिगमनादिसाधनतायाअर्थवादेनबोधनात्· मुमुक्षोरपिप्रत्यवायानु

त्पादरूपफलसाधनताबोधानन्तरप्रवर्त्तनेनतादृशफलसाधनत्वमपितत्रविध्यर्थः।नत्सानन्तंचक्षेमसाधारणम्· अथस्वर्गकामोय
जेतेत्यादितःस्वर्गादिसाधनत्वमेवप्रतीयते।नतुतात्पर्यप्रमादविष्टान्तरसाधनत्वमितिसमभिव्याहृतपदोपस्थापितकाम
नाविषयतावच्छेदकावच्छिन्नसाधनत्वेविधिप्रत्ययशक्तिःस्वीकार्यातथाचसंध्यावन्दनादिविधौफलकामनावाचकपदा
भावात्· कथंफलसाधनताबोधः यदिचविश्वजितायजेतेत्यादावेवफलकामवाचकपदंनश्रूयतेतथापिकल्प्यते।अपेक्षा
दापिविध्युपस्थापितोविधिप्रत्ययस्यस्वापस्थापितब्रह्मलोकावाप्त्यादिरूपेष्टविशेषतात्पर्यविषयफलबोधोपपाद
कताकारवाचकपदाध्याहारेऽपेक्षितोनोविशिष्टसाधनताबोधकत्वमित्युच्यते।तथाब्रह्मलोकावाप्त्यादिरूपकाम
बोधकपदमात्रसमभिव्याहारकल्पनेमुमुक्षावशेनकामनाशान्यस्यानधिकारापत्तिः।नरकाभावरूपफलेफले
फलकामबोधकपदमात्रसमभिव्याहारकल्पनेच।भावफलकामनाख्याधिकारतानुपपत्तिः।उभयफलकामस
समभिव्याहारकल्पनेच· सम्वलिताधिकारापत्त्या।एकैकमात्रफलकामस्याधिकारेनत्वादितितस्याकरणम्;

४

४ मत्यवायन्नानुवध्नीयात्‌॰ यद्दिव्यफलद्वयकामनया: पृथक्‌ धर्मिबोधकतया विशेषणमधिकारिपदं कल्प्यते
तदा वाक्यभेदाय त्वेवा वाक्यार्थभेदात्‌॰ यद्विन नरकनिवृत्तिब्रह्मलोकावाप्तिकामा इत्यादिपदमेकं कल्प्यते॰ तत्र चै
कफलविशेषतापन्नकामनायामपरस्यैककामनाविशेषतापन्नधर्मिराण्यरकामनाया वा॰ अन्वयेन तात्पर्यमुपेयते
येनोभयकाम एवाधीकारी स्यात्‌॰ अपि त्वेकफलधर्मितावच्छेदकतापन्नधर्मावच्छिन्नपरम्पराना श्रय धर्मिसामाना ४
धिकरण्येनान्वये तात्पर्यं॰ एवं सति वाक्यभेदस्याप्यनवकाशो विशेषणद्वयनिरूपितविशेष्यतयोरभेदस्यावच्छेद्या
वच्छेदकभावस्यैवा विशेष्यभेदेनासंभवेपि उभयधर्मिनिरूपितावच्छेदकतारूपविषयतयोरभेदस्यावच्छेद्याव
च्छेदकभावस्य सावस्यवशित्वात्‌॰ अत एव सर्वेभ्यो दर्शपूर्णमासा विस्तत्रमकृतवाचि सर्वपदोपस्थाप्यपुत्रपश्वादि हेरंब
फलानां तृष्टोमनाश्व दर्शितरीत्या पृथक्‌ पृथगेव कामनाधिकारिरूपविशेष्यतयोरन्वयेपि न वा स्वभेदः॥ न वाधव
ज्यर्द्दिरोच्छिनतीत्यादो भिन्नाभिन्नकर्मत्वच्छिदादे विशेषणत्वेपि तथा तथा सति समासानुपपत्तेः॥ न चैवमपि फलकाम

त् नाया॰ अधिकारीत्व विशेषणत्वेपि कामनाभून्यशौचादिमतां संध्यावदनाद्यकरणे प्रत्यवायो न स्यात्‌॰ इति वाच्यं॰ किंतर्थ
वाक्यस्य कामरूपाधिकाररहितसाधारणशौचादिमत एव प्रत्यवायद्वयत्र तात्पर्यात्‌॰ अत एव समर्थस्यास्तिकस्य नद
नुष्ठाने यत्सं ताद्दशप्रत्यवाये द्वेषेण तात्परिजिहीर्षावश्यकत्वात्‌॰ प्रत्यवायस्य प्रत्यवायेन बलवद्द्वेषः॥ अपि तु यन्नांतरीयकश्रम
दावेव तेन च न नानुष्ठीयत एव॰ नन्वेकस्येत्युच्यते॰ तथा यि सकृदनुष्ठितादर्शपौर्णमासादितः॥ पुत्रपश्वादिरूप नानाफ
लानामिव ताद्दशात्‌॰ संध्यावंदनादिनित्यकर्मलोपि नरकनिवृत्तिब्रह्मलोकगत्यादिरूपफलद्वयस्याप्रसिद्धिमसंगः॥
न लति वाक्ये फलद्वयस्य संभ्यकृतया बोधकसत्वेवैकत्विकफलमिति॰ योगसिद्ध्यधिकरणसिद्धांतात्‌॰ न च ताद्दश
स्थले भावरूपफलानामेवास मुच्चयः॥ न तु भावाभावफलयोरपि॰ इति वाच्यं॰ बीजसाम्येन विशेषात्‌॰ उत्पन्नोफलानां
स्वतएककामनायां युगपदन्वयरूपयोगो नास्ति॰ तत्र मिलितफलकामनाया॰ अनुचिकारितया प्रत्येकफलकाम
एवाधिकारीति॰ नानाफलकामनेयाएकानुष्ठानं न शास्त्रार्थमित्येव मुक्तसिद्धौ तु बीजं तं भावाभावफलसाधा

रणं॰ अपि न च फलकामानत्वेन कामनया॰ अधिकारतया समूहालंबनैककामनावत्तो विभिन्नकामनालय
५ वतो व्याहत एव समूहालंबनादिकामनायाः प्रत्येकमननादिविषयात्वेऽक्तेरित्यादौ सिद्धांतो निर्युक्तिक एवेति वाच्यं
शब्दानामवधारणपरतया॰ औत्सर्गिकतया क्वचिदसमुच्चितत्तत्फलकामबोधकपदानां तत्तत्फलकामना
परतया समूहालंबनादिरूपकामनावत्तोऽधिकारस्य युक्तत्वात्॰ अत्रोच्यते॰ नित्यकामस्थले हि मिष्टवि
रतिसंवलिततत्तत्फलकाम एवाधिकारी॰ अतो जयंतीव्रतादिः सकृदनुष्ठितात् विप्रत्यवायपरिहारस्त
त्फलं च सिद्ध्यति॰ एवं संध्यावंदनादितो न चैवं प्रत्यवायपरिजिहीर्षामात्रेण मुमुक्षूणां तत्तत्कर्मानुष्ठाना
नुपपत्तिरतोऽनधिकारित्वात्॰ इति वाच्यं॰ समुच्चितफलकामाधिकारिकर्मण एकैकफलकामनासहका हेरंब ५
रिणापि तत्तत्कामनाविषयफलजनकत्वापगमात्॰ अन्यथा काम्यादिम्न तस्य नरकाद्यभावनिश्चये
न तन्नरकोद्धारकामनारहिततत्संध्यादेः सहमरणस्य॰ सकलाभिष्टसंपन्नस्यानुपपत्तेः॥ व्यालग्राहि

यथा व्यालमित्यादिवचनैः पत्युर्नरकोद्धारादिसहितस्वर्गलोकभोगस्य सहमरणत्वबोधनात्॰ तत्कामना धु
न्यायाः सहमरणफलत्वबोधनात्॰ तत्कामनायाः सहमरणानधिकारात्॰ अत एव एतावान्महाराजे विशेष
धर्मो नित्यादिवाक्यबोधितमहत्त्वयः प्रभृत्येनेकत्लोका भागपूर्वकविष्णुलोकगमनादिफलकतडागपागादिकमपि
केवलविष्णुलोकगमनकामनया शिष्टैरभ्युपेयते॰ यदि च यादृशाचारफलात्॰ प्रत्येकफलकामकर्तव्यताबोधकश्रुति
रपि॰ तत्र कल्प्यं तद्दृत्युच्यते॰ तदा प्रकृते पितादृत्ताश्रुत्यनुत्तरमांसवशाद् देयमुभयफलकामनयापि शिष्टानां सकृदनुष्ठा
चा नात्॰ समुच्चीयतफलकामकर्तव्यत्वबोधकमपि श्रुत्यंतरमित्यंतरविरहस्य तुल्यतादित्यलं विस्तरेण॰ द्वितीयं जणेनाशा
पत्तिः॥ तस्य स्वप्रतियोगिसमवायिसमवेतत्वसंबंधेन खंडघटेऽपि सत्वात्॰ तदापत्तिद्रव्यवारणाय तत्तद्रव्यनाशं प्रति तत्त
त्संयोगनाशत्वेन हेतुता कल्पनीया॰ इत्थं चावयवविनाशस्थले संयोगनाशस्यापि कारणताकल्पने गौरवात्॰ तत्र स
मवायिनाशादेव द्रव्यनाश उचितः॥ न च स्वप्रतियोगिनिरूपितकालिकविशेषणताविशिष्टप्रतियोगित्वमानाधिकरण्य
संबंधेनैव संयोगनाशस्य हेतुत्वोपगमात्॰ महाघटनाशके संयोगनाशस्य प्रतियोगिनिरूपितकालिकविशेषणतयात्वत्

स्व

योगासमानकालीनखंडघटेसत्वात्· नैतादृशकारणबलेनखंडघटेनाशापत्तिरितिवाच्यं· एवंचयत्रकपालचतुष्टयार
ब्धघटस्यएककपालसंयोगनाशानंतरंकपालनाशउभयकपालेखंडघटोत्पत्तिश्चयुगपत्· अनंतरंतत्कपालविशिष्टक
५ पालसंयोगनाशः तत्रदुत्तरंतादृशसंयोगनाशात्· तादृशखंडघटनाशापत्तिर्दुर्वारैव· नचतादृशसंयोगेद्रव्यसमवायिका
रणतावच्छेदकवैजात्यानभ्युपगमात्· विजातीयसंयोगनाशस्यैवद्रव्यनाशहेतुत्वान्नघटनाशापत्तिरितिवाच्यम्· तादृश खंड
संयोगेवैजात्यानभ्युपगमेतादृशसंयोगवतिविनष्टकपालेमहाघटानुत्पत्तिप्रसंगात्· समवायिसंबंधेनजन्यद्रव्यत्वा
वच्छिन्नंप्रतिसमवायसंबंधेनविजातीयसंयोगत्वेनहेतुत्वात्· नचप्रतियोग्यधिकरणेसमयप्रागभावत्वविशिष्टका ६
ति लिकविशेषणताविशिष्टस्वप्रतियोगिसमानाधिकरण्यस्यप्रत्यासत्वान्नदोषः। तादृशखंडघटस्यतादृशसंयोगाधि
करणसमयप्रागभावसमवेतत्वात्· कालिकविशेषणतायास्तादृशप्रागभाववत्वाभावादितिवाच्यम्· एवंसतिघ हेरंब
टोत्पत्तिद्वितीयक्षणेकस्यचिद्द्रव्यस्यारंभकसंयोगनाशस्तत्तृतीयक्षणेतुद्रव्यनाशानापत्तेः। तादृशसंयोगनाशस्य
निरुक्तसंबंधेनतत्राप्यसत्वात्· नचप्रतियोगिनिष्ठसमवायावच्छिन्नजनकतानिरूपितजन्यतासंबंधेनविजातीयसंबंधेन

नाशस्यहेतुत्वोपगमात्· नखंडघटोत्पत्तिक्षणोत्पन्नसंयोगनाशात्खंडघटनाशापत्तिः। खंडघटस्यतादृशसंयोगाजन्य
त्वात्· दंडादिनाशात्तादृशघटनाशवारणायावच्छिन्नत्वस्यजनकतायांनिवेशइतिवाच्यं· खंडघटस्यापितादृशसंयोग
निष्ठविजातीयसंयोगत्वावच्छिन्नसामान्यजनकतानिरूपितजन्यताश्रयत्वात्; तादृशप्रत्यासत्यातत्संयोगनाशस्यापिस
त्वात्· तद्व्यक्तित्वावच्छिन्नजनकतावच्छिन्ननिवेशेनाननुगमात्· नचस्वप्रतियोगिनिष्ठविजातीयसंयोगत्वानवच्छि
न्नजनकताया एवसंबंधमध्येनिवेशात्· नतद्धर्मावच्छिन्नजनकतानिरूपितजन्यतामादायातिप्रसंग इतिवाच्यं·
एवंजनकतात्वस्याननुगतस्यदुर्वचतयाननुगमासंभवात्· एवंचरमसंयोगभिन्नसंयोगादीनांविशिष्यहेतुतायामा
नाभावात्· तथाविधसंयोगनाशानुत्पत्तिदशायांतादृशनाशप्रतियोगिनिष्ठविजातीयसंयोगत्वानवच्छिन्नद्रव्यजन
कतायाअभावात्· यत्तुस्वप्रतियोगिनिरूपितकालिकविशेषणताविशिष्टप्रतियोगिव्यापकस्यजनकतावच्छेद ना
कप्रत्यासत्तित्वोपगमात्· नखंडघटसमयोत्पत्तिकसंयोगनाशात्खंडघटनाशापत्तिः खंडघटस्यतादृशप्रतियोगि
संयोगाधिकरणीभूतविनष्टकपालेसत्वेनतत्प्रतियोगिव्यापकत्वाभावात्· स्वप्रतियोगिनिरूपितकालिकविशेषण

८

तावानिवेशात्ः यत्रावयवक्रियाविभागादिक्रमेणमहाघटनाशानंतरंपुनरवयवसंयोगात्तत्रोत्पन्नापूर्वघटारंभावस
कलघटकपालादेकूवखंडघटो।तत्तितत्रमहाघटनाशकव्यापकताया:खंडजटेपिसत्वात्ः नतथाविधनाशात्ःखंड
घटनाशप्रसंगः।स्वप्रतियोगिव्यापकत्वंचस्वप्रतियोगिनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वंनतुतादृशान्यं
ताभावप्रतियोगितानवच्छेदकधर्मवत्वंतथासतितथाविधद्रव्यत्वादिरूपधर्ममादायसर्वेषामेवव्यापकतयातद्धो
धाद्वारासंभवादितितदसत्ः प्रतियोगिसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकेतत्रसंयोगनाशं
सामान्यस्यस्वपदार्थत्वेसर्वेषामेवघटादीनांयत्किंचित्संयोगाधिकरणनिष्ठभेदप्रतियोगितावच्छेदकतयाज
न्यद्रव्यस्यनवच्छेदकत्वाभावात्ः तादृशविशिष्टप्रत्यासत्त्याअभावात्ः तन्नाशस्यतथात्वेवाननुगमात्ःइतिवे
न्मेवशजन्यद्रव्यासमवायिकारणतावच्छेदकवैजात्यांनरजातिविशेषणीकृत्यद्रव्यनाशंप्रतितादृशजात्यवच्छि हेरंब
न्नसंयोगनाशत्वेनहेतुताकल्पनात्ःखंडघटस्यसमयोत्पत्तिकनाशप्रतियोगिसंयोगेतादृशवैजात्यानभ्युप ८
मात्ःनखंडघटनाशप्रसंगः।प्रत्यासत्तिस्तुस्वप्रतियोगिनिरूपितकालिकविशेषणताविशिष्टस्वप्रतियोगि

सामानाधिकरण्यंनातोमहाघटनाशकालेसंयोगनाशात्ःखंडघटनाशप्रसंगः।नचद्वैतांशवैजात्यस्यक्रियाज
न्यतावच्छेदकजात्यासांकर्यात्ःसंयोगेनसंयोगस्याप्यसमवायिकारणतयातन्नाशादपिद्रव्यनाशोत्पत्तिः।तादृशा
जन्यतावच्छेदकजातियाप्यत्वासंभवादितिवाच्यम्ः क्रियाजन्यतावच्छेदकजातेरेतादृशजातिव्याप्यविरुद्धभेदेनना
नात्वेस्वीकारात्ः नचतादृशजातेर्नानात्वमादायविनिगमनाविरहइतिवाच्यम्ः तादृशजातेर्नानात्वेसंयोगनाश
हेतुतायांव्यभिचारः।कार्यतावच्छेदकजातेतथात्वस्यव्यभिचारासंभ्यादकत्वादितिकृतपल्लवेन॥ इतिद्रव्यनाश
वादार्थःसमाप्तः॥ प्रमादीमार्गेघनश्यामस्येदं

841

૮

દ્રવ્ય નાથે વાદાર્થ

૮